M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 1528

Title: Tarka Sangraha

1528

InComplete

C

	Tarka	Sangraha	Title
			Author
			Editor
Sk			Year, Vols.
			Publisher
1528			Remarks

...धर्मावि... कत्वे सति विरुद्धनानाधर्मप्रकारकत्वे सति ... नत्वं ... [illegible]
... [illegible] ... धर्मा वर्तते

श्वरसंकेतः शक्तिः ॥ आकांक्षा योग्यता संनिधिश्च वाक्यार्थज्ञानहेतुः ॥ पदस्य पदांतरव्यतिरे
कप्रयुक्तान्वयाननुभावकत्वमाकांक्षा ॥ अर्थाबाधो योग्यता ॥ पदानामवि
लंबेनोच्चारणं संनिधिः ॥ आकांक्षादिरहितं वाक्यं अप्रमाणं ॥ यथा गौरश्वः पुरुषो हस्तीति
वाक्यं न प्रमाणं ॥ आकांक्षाविरहात् ॥ अग्निना सिंचेदिति न प्रमाणं ॥ योग्यताविरहात् ॥ प्रहरे प्र
हरे असहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् ॥ वाक्यं द्विविधं वैदिकं लौकि
कं चेति ॥ वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणं ॥ लौकिकं तु आप्तोक्तं प्रमाणं अन्यदप्रमाणं ॥ वाक्या
र्थज्ञानं शाब्दज्ञानं ॥ तत्करणं शब्दः ॥ इति यथार्थानुभवो निरूपितः ॥ अयथार्थानुभवस्त्रिविधः
संशयविपर्ययतर्कभेदात् ॥ एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यज्ञानं संशयः ॥ यथा स्था
णुर्वा पुरुषो वेति ॥ मिथ्याज्ञानं विपर्ययः ॥ यथा शुक्ताविदं रजतमिति ॥ व्याप्यारोपेण व्यापकारो
पस्तर्कः ॥ यदि वह्निर्न स्यात्तर्हि धूमोपि न स्यादिति ॥ स्मृतिरपि द्विविधा यथार्था अयथार्था च ॥ प्रमाजन्या
यथार्था ॥ अप्रमाजन्या अयथार्था ॥ सर्वेषामनुकूलवेदनीयं सुखं ॥ सर्वेषां प्रतिकूलवे
दनीयं दुःखं ॥ इच्छा कामः ॥ क्रोधो द्वेषः ॥ कृतिः प्रयत्नः ॥ विहितकर्मजन्यो धर्मः ॥ निषिद्धकर्म
जन्योऽधर्मः ॥ बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः ॥ बुद्धीच्छाप्रयत्ना द्विविधा नित्या अनित्याश्च ॥ नित्या ई
श्वरस्य ॥ अनित्या जीवस्य ॥ संस्कारस्त्रिविधः ॥ वेगो भावना स्थितिस्थापकश्च ॥ वेगः
पृथिव्यादिचतुष्टयमनोवृत्तिः ॥ अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः ॥ अन्य...

नावच्छेदकत्वे प्रतियोगिता[illegible]

पाकजत्वस्य गुणस्य सर्वस्य [illegible] स्थितिस्थापकः॥ कटादिपृथिवीमात्रवृत्तिः। चलनात्मकं कर्म
॥ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं॥ अधोदेशसंयोगहेतुरपक्षेपणं॥ शरीरसन्निकृष्टसंयोगहे
तुराकुंचनं॥ शरीरविप्रकृष्टसंयोगहेतुः प्रसारणं॥ अन्यत्सर्वं गमनं॥ पृथिव्यादिचतुष्टयमनोमा
त्रवृत्तिः कर्म॥ नित्यमेकमनेकानुगतं सामान्यं॥ द्रव्यगुणकर्मवृत्ति॥ परं सत्ता अपरं द्रव्या
त्वादि॥ नित्यद्रव्यवृत्तयो व्यावर्तकाः विशेषास्त्वनंता एव॥ नित्यसंबंधः समवायः॥ अयुत
सिद्धवृत्तिः॥ ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ
यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावंतौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति
अनादिः सांतः प्रागभावः॥ उत्पत्तेः पूर्वं कार्यस्य॥ सादिरनंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य
त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभावः॥ यथा भूतले घटो नास्ति॥ तादात्म्यसंबं
धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः॥ यथा घटः पटो न भवति॥ सर्वेषां विवक्षायां पदार्था
नां यथायथमुक्तेष्वंतर्भावात्सप्तैव पदार्था इति सिद्धं॥ काणादन्यायमतयोर्बा
लव्युत्पत्तिसिद्धये। अन्नंभट्टेन विदुषा रचितस्तर्कसंग्रहः॥ ॥ तर्कसंग्रहः समाप्त
पा॥ ७॥ ॥

संबंधत्वं संयोगसमवायान्यतरत्वं तथा च [illegible] विशिष्टबुद्धिनियामकत्वं [illegible]
भावत्वं [illegible] अनुयोगिता [illegible]